# संस्कृतवार्ता:

दिनाङ्क :- 03.01.2026

प्रात: - 06:55

<u>प्रधानमन्त्रिणा/ सांस्कृतिक परिसर</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदेहल्यां राय-पिथौरा-सांस्कृतिक-परिसरे भगवता बुद्धेन सम्बद्धस्य भव्य-पिपराहवा-स्मारकस्य उद्घाटनं विदध्यात्। सञ्चारतन्त्रपटले प्रधानमन्त्री श्रीमोदी ख्यापितवान् यत् अद्य इतिहास-संस्कृति-भगवत: बुद्धस्य आदर्शै: सह अनुरागधारिणां कृते महत्वपूर्ण: दिवस:। श्रीमोदी प्रोक्तवान् यत् एतस्यां प्रदर्शन्यां शताधिकसमयात् पुनरानीतै: पिपराहवा-अवशेषै: सह नवदेहल्या: राष्ट्रिय-संग्रहालये अथ कोलकाताया: भारतीय-संग्रहालये च संरक्षितपिपराहवा-सम्बद्धानां प्रामाणिक-अवशेषाणां पुरातात्विक-सामग्रीणाञ्च प्रदर्शनं स्यात्। श्रीमोदी ख्यापितवान् यत् एषा प्रदर्शनी भगवत: बुद्धस्य महतां विचाराणां लोकप्रियकरणस्य शासनस्य प्रतिबद्धतानुरुपम् वर्तते।

<u>प्रधानमन्त्रिणा नरेन्द्रमोदिना</u>

मन्त्रिमण्डल-सचिव: टीवी सोमनाथन् इत्यसौ प्रोक्तवान् यत् प्रधानमन्त्रिण: सक्रियशासनाय समयबद्धकार्यान्वयनाय च अग्रणीमंचेन 'प्रगति ' इत्यनेन परियोजनानां कल्याणकारि योजनानां च कार्यान्वयने तीव्रता समागता। नवदेहल्यां प्रगतिप्रणाल्या: परिणामविषये वार्ताहरान् सम्बोधयन् श्री सोमनाथन् इत्यसौ ज्ञापितवान् यत् साम्प्रतं यावत् प्रगति सम्बद्धानि पञ्चाशत्-उपवेशनानि समायोजितानि , एतदन्तर्गतं च पञ्चाशीतिलक्ष-कोटिमिता: त्रिसहस्त्राधिका: परियोजनाश्च समीक्षिता:। असौ ज्ञापितवान् यत् 'एक राष्ट्र-एक राशनकार्ड' अथ पीएम-जन-आरोग्य-सदृशा: एकषष्टि-मिता: शासनीय-योजना: साम्प्रतं यावत् समीक्षिता:।

<u>इलेक्ट्रानिक्स्-यन्त्रांश</u>

इलेक्ट्रानिक्स्-यन्त्रांश-निर्माण-योजनायाः तृतीयभागस्य अन्तर्गतं द्वाविंशति: नूतनप्रस्ताव: केन्द्र◌ेण अनुमोदित:, यस्मिन् त्रिषष्ट्यधिक अष्टशताधिक एक चत्वारिंशत् सहस्र कोटिरूप्यकाणां परिकल्पित: निवेशः अन्तर्भवति। एतेषु अनुमोदनेषु मोबाइल-निर्माणम्, दूरसञ्चारम्, उपभोक्तृ-इलेक्ट्रानिक्स्, व्यूहात्मक-इलेक्ट्रानिक्स्, ऑटोमोटिव्, आई.टी. हार्डवेयर इत्यादीनां एकादश लक्ष-खण्ड-उत्पादानां निर्माणम् अन्तर्भवति। एतानि परियोजनानि अष्ट पंचाशत◌् सहस्राधिक द्विलक्षाधिक सहस्र-कोटिरूप्यकाणां उत्पादनं जनयितुं, प्रायः चतु: त्रिंशत् सहस्रं प्रत्यक्ष-कार्यस्थानानि जनयितुं च अपेक्षन्ते।

<u>ऋतु विभाग</u>

भारतीय-ऋतु-विज्ञान-विभागेन, अद्य दिल्ली, हरियाणा, पञ्जाब्, ओडिशा, राजस्थान, चण्डीगढ-इत्येतेषु प्रदेशेषु अति नीहारच्छादनं भविष्यतीति अनुमानितम्। बिहार, हिमाचलप्रदेशः, जम्मू-कश्मीर, लद्दाख्, इत्येतेषु प्रदेशेषु अग्रिमेषु त्रिषु दिनेषु नीहारच्छादनस्य पूर्वानुमानम् अपि भारत-ऋतु -विज्ञान- विभागेन प्रकटितम्। अस्य मासस्य षड् दिनाङ्कपर्यन्तं उत्तरप्रदेशे, उत्तराखण्डे, पश्चिमवङ्गदेशे, सिक्किम्-राज्ये, उत्तरपूर्व राज्येषु च एतादृशी एव स्थितिः प्रवर्तते।

महिला-हॉकी

महिला-हॉकी-इंडिया-लीग-प्रतिस्पर्धायां 'रांची रॉयल्स' इत्येतेन दलेन 'जे.एस.डब्ल्यू.-सूरमा-हॉकीक्लब' इति दलं द्वि-शून्यम्-इत्यन्तरालेन पराजितम्। रांची नगरे मरांग-गोमके-जयपाल-सिंह-मुंडा-टर्फ-क्रीडांगणे समायोजिते द्वन्द्वे एतस्मिन् रुतुजा दादासो पिसाल, अथ साक्षीराणा-इत्येताभ्यां द्वि-गोलांका: समर्जिता:।

॥ इति वार्ता:॥